It would be noted that in the first and third lines there are six short syllables, followed by the scheme — ◡ — ◡ — —while in the second and fourth lines, a long syllable is introduced among the first six short syllables after the fourth. The real cadence seems to be that in the first line there are five short syllables followed by two feet of three syllables each like ◡ —/ ◡ — ◡ —and then a long syllable at the end. In the second line another long syllable is introduced before the last of the first five short syllables.

The same scheme we find in *Viyoginī* also

atha mohaparāyaṇā satī ◡ ◡ — ◡ ◡ — ◡ — ◡ —
vivaśā kāmavadhūr vibodhitā ◡ ◡ — — ◡◡—◡—◡—
vidhinā pratipādayiṣyatā ◡ ◡ — ◡ ◡ — ◡ — ◡—
navavaidhavyam asahyavedanam ◡ ◡ — — ◡ ◡ — ◡ — ◡ —

The common notation of	Sa	Sa	Ja	Ga	
	Sa	Bha	Ra	La	Ga

gives no idea of the relation of the two lines from the point of view of cadence.

The *yatis* show that in such metres each line has a few distinct parts, corresponding to the so-called *pādas* into which a *Rgvedic* verse is divided when such *pādas* exceed two in each half. These *pādas* of four, five, six and seven syllables must be taken as constituent parts of a longer metrical division, each constituent part having a distinct individuality. I have also shown earlier in this Paper that the end of a *yati* division shows a clearer stop than the end of a *pāda* in metres like *Anuṣṭup*, *Indravajrā*, etc. The different metres are constituted by the combination of such parts in later Sanskrit.

We cannot get at the cadence of the metres when we have a notation based on the eight groups of syllables on a three syllabic scheme. Let us put down such notation for a few metres that have been shown to have an intimate mutual affinity on the basis of cadence, and see how far such notations indicate the relationship.

Indravajrā	Ta	Ta	Ja	Ga	Ga (Ga means *Guru*, long)	
Upendravajrā	Ja	Ta	Ja	Ga	Ga	
Vamśastha	Ja	Ta	Ja	Ra		
Vasantatilaka	Ta	Bha	Ja	Ja	Ga	Ga

Although we see the relation in the case of the first three, we completely miss it in respect of the last. Now for the other groups that I had noticed before, let us see the relation as indicated by the notation.

Malinī	Na Na Ma Ya Ya
Mandākrāntā	Ma Bha Na Ta Ta Ga
Hariṇī	Na Sa Ma Ra Sa La Ga (La. means *Laghu*, short).
Sārdūlavikrīdita	Ma Sa Ja Sa Ta Ta.
Sragdharā	Ma Ra Bha Na Ya Ya Ya

We see some relation in the beginning among *Mandākrāntā*, *Śārdūlavikrīḍita* and *Sragdharā*, and in the end between *Mālinī* and *Sragdharā*. But we totally miss the relation of *Mandākrānta* to these two metres at the end. There appears some relation between *Manḍākrāntā* and *Śārdūlavikrīḍita* at the end, which actually does not exist. In the middle portion we are not able to detect any trace of the affinities.

The cadence is determined by two factors : by rhythm (sequence of short and long syllable) and by beat (regular stops). In recitation, the rhythm is more important ; but in singing, beat is more important, while the value of rhythm cannot be overlooked. In the recitation, perhaps beat has little value. Sanskrit metres have got themselves bifurcated into those used for singing and those for recitation. The former developed as the *mātrā* metres and the latter as the syllabic metres. But even in the syllabic metres, there is an element of beat apart from the rhythm of a whole line, which was gradually ignored. The *yatis* are the survivals of the beats that were original elements in Sanskrit metres. In the above Paper I have tried to show the method of approach to get at the original element of beat.

Terms like *Gāyatrī* and *Śakvarī* are purely atrificial ones, with no special significance when applied to Vedic metres. They must have had a significance in the Vedic language itself : but as names of metres, they are not used with any such specific meaning. The terms occur in the Vedas, but not as names of such definite metres. Similarly, names like *Indravajrā* and *Mālinī* are also mere names. They have no definite significance. We have to re-examine the metres and classify them according to the quality of their internal

cadence and not according to the number of syllables and the total sequence of short and long syllables. We have also to ascertain the relation of the Vedic metres to the metres in Classical Sanskrit. The most fruitful investigation will be the relation of Sanskrit metres to metres in Dravidian literatures. I give the following as an example of the close relationship and conclude the Paper :

Sanskrit : — ◡ — / ◡ ◡ ◡ / — ◡ — / ◡◡◡ / — ◡ — / ◡◡◡ /
Dravidian — ◡ — / ◡ ◡ / — ◡ — / ◡ ◡ / — ◡ — / ◡◡ /
— ◡ —
— ◡ —

where each of the three feet of short syllables in Sanskrit are obtained by one short syllable added to the Dravidian scheme of two short syllables in that position.

MĀYĀ VIVARAṆA OF ŚRĪ ŚAṀKARĀCĀRYA

Edited with an introduction By

T. CHANDRASEKHARAN, M.A., L.T.,
Curator, Government Oriental Manuscripts Library, Madras.

INTRODUCTION.

In the *Kaṭha*-upaniṣad, it is said, "The good and the pleasant approach man: the wise goes round about them and distinguishes them. Yea, the wise prefers the good to the pleasant, but the fool chooses the pleasant through greed and avarice"[1].

The worshipful *Bhāṣyakāra* Śrī Śaṁkarācārya repeats this idea in his *Gītā-Bhāṣya* thus, "That Worshipful Lord created this world, and in order to preserve and protect it, He first created Marīci and other *Prajāpatis* and taught them the *Pravṛtti-Dharma* expounded in the *vedas.* He also created people of a different type, like Sanaka and Sanandana, and taught them the *Nivṛtti-dharma*, which is characterised by knowledge and the discarding of worldly pleasures. Thus the *vedas* teach two kinds of *dharmas*, viz., *pravṛtti-dharma* and *nivṛtti-dharma.*[2].

Worldly-minded people naturally prefer the *pravṛtti-dharma* which has been discussed, together with its means, ends and other details, in the 12 chapters of the *pūrva-mīmāmsā*, beginning with the aphorism "Then therefore the discussion of Dharma"[3], by the worshipful teacher Jaimini. Many such scriptural texts "The Self-existent pierced the openings (of the senses) so that they turn forward: therefore man looks forward, not backward into himself. Some wise man, however, with his eyes closed and wishing for immortality, saw the Self behind"[4], "Desiring thus"[5], etc. explain in detail how the Worldly-minded prefer the *pravṛtti-dharma*, which, however, cannot be the supreme goal of human desires,

(1) Kaṭha—I-2-2: Translation in the SACRED BOOKS OF THE EAST. Vol. XV. Ed. by F. Max Muller.

(2) Śaṁkara's introduction to the Gītā Bhāṣya.

(3) P. M. Sutras. I-1-1.

(4) Kaṭha. II-1-1.

(5) Bṛhadāraṇyaka—IV.-4-6.

as it is created by human effort and hence perishable ; for the scripture itself declares " Just as those material things that are created, by human effort, perish. So also the things of the other world, that are earned by religious merit, perish "[1].

" These sacrifices are very weak and unreliable boats (to ferry man over to salvation). Those people are fools who mistake these sacrifices as the means to supreme good and they fall again into old age and death "[2]. " Through avarice and greed (selfish) people, immersed in religious deeds, do not understand (the supreme good), and so when their periods of happiness are over, fall down from their happiness in distress "[3]. " After examining the worlds acquired by religious deeds, a Brahmin must regretfully note now the imperishable is not attained by perishable means "[4].

The *smṛtis* also declare, " When the religious merit (of men) is spent out by the enjoyment of the fruits thereof, those that earned that merit enter the world of the mortals "[5], " O ! Arjuna ! all worlds, from that of the Creator downwards are perishable "[6], etc.

So the wise must turn away from the *pravṛtti-dharma,* in order to enquire about the *nivṛtti-dharma,* the *supreme* good that it is not the product of human efforts, and hence perfect. For, the Scripture itself says, " For the knowledge of the (Supreme good) the Brahmin shall approach only his teacher "[7], " A bold man, desiring immortality turns away his eyes towards the inner soul and sees it "[8], " O ! Darling ! It is the soul that ought to be seen "[9]. " He, who knows the soul, overcomes grief "[10], etc.

" The *smṛtis* also say " That Dharma is perfect, which teaches us the *brahman* "[11], etc. This *nivṛtti-dharma,* which requires good practice and a mind discarding worldly pleasures, its means, and its fruit are discussed by the worshipful Bādarāyaṇa in the four chapters of the *Śārīraka Brahma Mīmāmsā*, otherwise called *Uttara-mīmāmsā,* beginning with " Then therefore the discussion of

(1) Chāndogya—VIII-1-6.
(2) Muṇḍaka—I-2-7.
(3) Muṇḍaka—I-2-9.
(4) Muṇḍaka—I-2-12.
(5) Gītā—IX-21.
(6) Gita—VIII-16.
(7) Muṇḍaka—I-2-12.
(8) Kaṭha—II-1-1.
(9) Bṛhadāraynāka—II-4-5.
(10) Chāndogya—VII-1-3.
(11) Śaṁkara in the introduction to the Gītā Bhāṣya.

Brahma "[1]. This *nivrtti-dharma* is not by nature easily understandable, though the scripture and logic support it. So we are not able to understand it and even the Gods, whose knowledge is supposed to be very great, do not understand it. In this connection Bhagavatpāda Śri Śaṁkarācārya says (*vide* His Gloss on the Chāndogya-upanisad, VIII-12, 1), " If it is said that all the things in the Phenomenal world are true, (I reply) ' Be it so ', as it is all not easily understandable. (Under the instruction of Prājapati) Indra, the Lord of the Gods, looked into a pan of water and came to the conclusion that the soul will perish in fact as soon as the body perishes, though Prajāpati's aim was to make Indra and Virocana realize the facts and reasons in support of the immortality of the soul.

Similarly Virocana, born in Prajāpati's family and very intelligent looked upon the body alone as the soul ; the Bauddhas got drowned in that ocean of fear caused to Indra by the thought of the destruction of the soul ; the Sāṅkhyas understood the ' seer ', the intellegent soul, as different from the body, etc., but got (fell) into the doctrine of separateness or plurality that is the ' cause of death ', because they renounced the authority of the Vedas ; and the followers of Kāṇāda began to examine the soul, which (they imagined) to be a substance endowed with nine qualities, like a piece of cloth coloured red with some dyes, etc., ; others, who accept the *vedas* as their authority, are however enticed by external objects and hence are deeply devoted to (religious) actions, and like Indra they also look upon the great truth of the oneness of the soul as if it were a kind of destruction of their own soul, and like the picota, ever whirl about up and down through numerous births and deaths ; and other people who are foolish and petty-minded naturally prefer the (pleasures of) external objects, etc ".

Another calamity has fallen upon the modern world, i.e., the meaning of the *vedas* is and has been twisted, according to their predilections, by commentators like the ancient Bhartṛprapañca and numerous others. In his gloss on the Bhagavadgītā Śrī Śaṅkarācārya also states, " This *Gītā* embodies the quintessence of the meanings of all the *vedas* and cannot be easily understood. And many have explained the words, sentences and the reasonings found

---

(1) Brahmasūtras—I-1-1.

in it; but as these numerous explanations are contradictory, as viewed by the ordinary people, I shall briefly determine its meaning in the light of intellegent criticism "[1]. The purpose of the incarnation of Śri Śaṅkarācārya was to remove the confusion and misconceptions regarding *vedic dharma*, and so he wrote clear and grand glosses on all the *Upaniṣads*, the seven hundred verses of the *Bhagavadgītā*, and the *Brahma-sūtras* for the benefit of advanced and superior students. There are also inferior students and midlings. *Ācārya Gauḍapāda* also refers to these three classes of students [2]. Thus, for the study and use of lower grades of students, Śri Śaṁkarācārya composed numerous works like the *Upadeśasahasra*, in simple style calculated to appeal to various degrees of intelligence. One such elementary work is the *Māyā-vivaraṇa*, consisting of five sections.

In the first section, the topics explained, are *Adhyāropa*, *apavāda* and *Jīvanmukti*. *Adhyāropa* is the superimposition of this world (phenomenal) of changes, actions, results, bodies, etc., on the *Brahman*, in consequence of not knowing the true nature of *Brahman*; and it is like mistaking a rope for a serpent, nacre for silver, the mirage for water and a pillar for a man. When the mistake is realized, the imaginary things vanish; similarly when the false appearance of this world is realized, we have *Apavāda*.

In the second section, the subject of the work, the benefits of its study, the connection between the subject and the book and the four qualifications necessary for the student of the work are explained.

The third section contains an explanation of the *Avacchedavāda*, *Bimba-prati-bimba-vāda*, etc. The reasons for the view that variety and the appearances of the non-self are not the true essence of Brahman are detailed here.

The fourth section tells us with authorities, that, owing to past misdeeds, the soul enters bodies, which bring misery on it. This misery is only an accident and not of the essence of the soul. Bliss is the essence of the soul and therefore natural to it, when it is not confined in a body, from which however the soul is liberated by right knowledge, which alone is the true cause of salvation.

---

(1) Śaṁkara's introduction to Gītā Bhāṣya.

(2) Gauḍapāda Kārikā—III-16.

The fifth section teaches us clearly that actions are good, bad and mixed, and as a result of them, we see superior, inferior and mixed things, in this world, and that the soul is by itself inactive, but makes (the three kinds of) organs of the body perform actions. In itself the soul has no likes or dislikes and it has to apply three kinds of remedies against those three kinds of actions that prevent the soul from attaining salvation.

This work has been named *Māyāvivaraṇa*, because it is *Māyā* that expands itself and produces these appearances and this phenomenal world, for *Māyā* has the power of accomplishing the apparently impossible. This booklet explains all this work of *Māyā* in detail; and though it is quite suitable for lower classes of students by reason of its simple and clear style, none can deny the great benefits that higher grades of students will certainly derive from a study of it. Hence this primer is published and made available to all.

The original of this work available in the Government Oriental Manuscripts Library, is referred to under D. 1021, in the Descriptive Catalogue of the Sanskrit Manuscripts, Vol. II, edited by Prof. M. Rangacharyar. It is a paper manuscript of the size 13 × 8 inches with an average of 20 lines on a page, written in Grantha Script. It contains a collection of 26 independent works, of which the *Māyāvivaraṇa* forms the last. The condition of the manuscript is good though it appears to be old. *Māyavivaraṇa* was described as an independent work, D. No. 4717 in Vol. IX of the Descriptive Catalogue, of Sanskrit Manuscripts, by Prof. M. Rangacharyar. It was restored in Devanagari Script as R. No. 7704 in 1942-43.

It was not printed till now though it appears to be an important work from the standpoint of Advaita Philosophy. Ref. to R. 124.

T. CHANDRASEKHARAN.

॥ श्रीः ॥

श्रीशङ्करभगवत्पादविरचितं

मायाविवरणम्

बालानामुपकाराय ममापि ज्ञानसिद्धये ।
तत्र श्रीबालगोपालकृष्णः सन्निहितो भवेत् ॥

इह खलु धर्मार्थकाममोक्षाणां चतुर्विधपुरुषार्थानां मध्ये मोक्ष एव परमपुरुषार्थः; नित्यत्वात्, 'न च पुनरावर्तत' इति श्रुतेः । इतरेषां त्रयाणां न तथात्वम्; अनित्यत्वात्, 'तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते' इति श्रुतेः ।

स मोक्षश्च ब्रह्मज्ञानादेव सिध्यति; 'तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय' (इति) 'ब्रह्मविदाप्नोति परम्' इत्यादिश्रुतिभ्यः । तद्ब्रह्म [अध्यारोपापवादपूर्वमेव सुविज्ञेयम्], 'अध्यारोपापवादाभ्यां ज्ञातव्यः तत्वनिर्णय (इति) न कर्मणा न प्रज्ञया न त्यागेन धनेन वा' इति श्रुतेः । तस्मान्मुमुक्षुणा अध्यारोपापवादाववश्यं ज्ञातव्यौ ।

अत्राध्यारोपो नाम शुक्तिकायां रजतवत्, रज्जौ सर्पवत्, मरुमरीचिकायां जलवत्, स्थाणौ पुरुषवच्च निष्प्रपञ्चात्मवस्तुनि प्रपञ्चारोपः । अयमध्यारोपो वस्त्वज्ञानादारोपः । तदज्ञानमेवाविद्या तमः मोहः मूलप्रकृतिः प्रधानं गुणसाम्यमव्यक्तं मायेति चोच्यते । मूलप्रकृतिर्नाम शुक्लकृष्णरक्ततन्तुसमुदायरूपरज्जुवत्सत्वरजस्तमोगुणसमुदायरूपा । अस्याः प्रलयो महासुषुप्तिरिति च नाम । अस्यां मूलप्रकृतावनन्तकोटिजीवाः स्वस्वकर्मवासनाभिः सह जतुपिण्डे स्वर्णरेणव इव सृष्टेः पूर्वं लीना वर्तन्ते । अयमनुभवः सकलजनानां सुषुप्तावस्ति ।

सा मूलप्रकृतिः सृष्टिकाले परिपक्वजीवकर्मवशान्माया अविद्या तामसीति त्रिधा जाता । तत्र माया शुद्धसत्वप्रधाना । तत्र प्रतिबिम्बितं सत्सृष्टेः पूर्वं विद्यमानं ब्रह्मचैतन्यमीश्वर इत्युच्यते । अस्याव्याकृतोऽन्तर्यामीति

च नाम । स एव जगत्स्रष्टा । स एव परिपूर्णब्रह्मचैतन्यरूपेण तामस्यवच्छिन्न एव सन्, जगदुपादानकारणमपि भवति, ऊर्णनाभिवत् । स उपाधिप्राधान्येनोपादानकारणं स्वप्राधान्येन निमित्तम् ।

अयमीश्वरः केन प्रकारेण जगत्सृष्टवानिति चेत्, उच्यते — पूर्वोक्ताविद्या रजःप्रधाना बहुप्रकारानन्ता । तदविद्याप्रतिबिम्बितचैतन्यरूपा जीवा अप्यनन्ताः । अनयोर्जीवेश्वरयोर्व्यष्टिरूपाविद्या समष्टिरूपा मूलप्रकृतिश्च क्रमेण कारणशरीरे । तयोः कारणशरीरयोर्जीवस्येश्वरस्य चावस्थानं सुषुप्त्यवस्था । तयोः स्वस्वकारणशरीरमेवानन्दमयकोश एव कारणप्रपञ्चसृष्टिः ।

अथ सूक्ष्मप्रपञ्चसृष्टिरुच्यते—ईश्वरस्येक्षणवशात्तमोगुणरूपा प्रकृतिरावरणशक्तिर्विक्षेपशक्तिरिति च द्विधा जाता । तत्र विक्षेपशक्तिरेव सूक्ष्म आकाशोऽभूत् आकाशाद्वायुः । वायोरग्निः । अग्नेरापः । अद्भ्यः पृथिवी । एषां पञ्चभूतानां सूक्ष्मभूतान्यपञ्चीकृतानि तन्मात्राणि चेति नाम । एषामपि सत्वरजस्तमोगुणाः कारणादज्ञानादागताः सन्ति ।

एतेषामाकाशादीनां पृथक् पृथक् सत्वगुणांशाच्छ्रोत्रं, त्वक्, चक्षुर्जिह्वा, घ्राणामितिपञ्च ज्ञानेन्द्रियाणि क्रमेण जातानि । आकाशादिसत्वसमष्ट्यान्तःकरणं जातम् । मनोबुद्धिचित्ताहङ्कारभेदेन तच्चतुर्विधम् । तत्र बुद्धावहङ्कारस्य मनसि चित्तस्य चान्तर्भावः । एवमाकाशादिरजोगुणांशाद्वाक्पाणिपादपायूपस्था इति पञ्च कर्मेन्द्रियाणि जातानि । आकाशादिरजोगुणसमष्ट्या प्राणो जातः । प्राणापानव्यानोदानसमानभेदेन स पञ्चविधः ।

एतज्ज्ञानेन्द्रियपञ्चकं कर्मेन्द्रियपञ्चकं मनोबुद्धिश्चैकीभूय सूक्ष्मशरीरं लिङ्गाख्यमु (त्पद्यते) [च्यते] । इदमेव भोगसाधनम् । अस्मिन्सूक्ष्मशरीरे जीवेश्वरयोरवस्थितिः स्वप्नावस्था । अस्मिन् ज्ञानमयकोशमनोमयकोशप्राणमयकोशाः सन्ति । एवं सूक्ष्मसृष्टिप्रकारः (सूक्ष्मशरीरं लिङ्गाख्यमुच्यते) ।

अथ स्थूलसृष्टिरुच्यते । तमोगुणप्रधानानि पञ्चभूतानि पञ्चीकृतानि आकाशादीनि पञ्चापि भूतानि प्रत्येकं द्विधा विभज्यैकैकमर्धं चतुर्धा विभज्य स्वार्धभागं विहायेतरार्धभागेषु संयोजनं पञ्चीकरणम् । एवं कृते

पश्चापि पञ्चीकृतानि भवन्ति । एभ्यः पञ्चीकृतेभ्यो ब्रह्माण्डं, तदन्तश्च-तुर्दशभुवनानि, तेषु चोद्भिज्जस्वेदजाण्डजजरायुज[भेदात्] चतुर्विधस्थूलशरीराणि अन्नादिभोग्यवस्तूनि च जातानि । एतस्मिँन्स्थूलशरीरे जीवेश्वरयोरवस्थानं जाग्रदवस्था । इदं स्थूलमेवान्नमयकोशः । एवं स्थूलसृष्टिप्रकारः ।

इदं कारणसूक्ष्मस्थूलशरीरत्रितयं च प्रत्येकं व्यष्टिसमष्टिभेदेन द्विविधम् । [यथा] वनं ग्राम इत्यादिः समष्टिः । वृक्षो गृहमित्यादिर्व्यष्टिः । एवं सर्वशरीरं समष्टिः । एकशरीरं व्यष्टिः । तत्र समष्ट्युपाधिक ईश्वरः । व्यष्ट्युपाधिको जीवः ।

तत्रापि कारणसमष्ट्येश्वरः । कारणव्यष्ट्या प्राज्ञः ।
सूक्ष्मसमष्ट्या हिरण्यगर्भः । सूक्ष्मव्यष्ट्या तैजसः ।
स्तूलसमष्ट्या वैश्वानरः । स्थूलव्यष्ट्या विश्वः ।

इति जीवेश्वरयोरवान्तरभेदः ।

अयमेवेश्वरः सत्वरजस्तमोगुणैरुपाधिभिर्ब्रह्मविष्णुरुद्ररूपेण सृष्टिस्थिति-संहारा[न्] करोति । ब्रह्मणो विराड्रूपेऽन्तर्भावः । विष्णोर्हिरण्यगर्भे(चा)ऽन्तर्भावः । रुद्रस्येश्वरेऽन्तर्भावः । एवं प्रपञ्चोत्पत्तिः । अयमेवाध्यारोपः । इदं विक्षेप-शक्तिकार्यम् ।

अथावरणशक्तिकार्यमुच्यते—ईश्वरमात्मज्ञानिनं च विहायान्येषां सर्वेषां जीवानां पञ्चकोशानामात्मनश्चाभेदमावरणशक्तिरन्धकाररूपावृणोति । आवरणं च द्विविधम् । असत्वावरणमभानावरणं चेति । वस्तु नास्तीति व्यवहारकारणमसत्वावरणम् । वस्तु न भातीति व्यवहारकारणमभानाव-रणम् । आवरणशक्तिकार्यमेव संसारवृक्षस्य मूलं, न विक्षेपशक्तिकार्यम् । एतन्मोक्षसिद्धेरपि हेतुः ।

द्विविधमप्यावरणं तत्वज्ञानेन विनाश्यम् । तत्वज्ञानं च परोक्षज्ञान-मपरोक्षज्ञानमिति द्विविधम् । अत्र गुरुमुखाद्वेदान्त (ज्ञान) [श्रवण] जन्यं परोक्षज्ञानम् । इदमेव श्रवणम् । अनेन वस्तु नास्तीत्येवंरूपमसत्वावरणं नश्यति । तदा वस्त्वस्तीति व्यवह्रियते ।

श्रवणेन संशयं मननेनासम्भावनां निदिध्यासनेन विपरीतभावनां [च] निवर्तयित्वा देहात्मज्ञानाद्ब्रह्मात्मज्ञानं (च) जायमानमपरोक्षज्ञानम् । अनेन वस्तु न भातीति व्यवहारहेतुरभानावरणं विनश्यति । एवं परोक्षज्ञानेनापरोक्षज्ञानेन च ब्रह्म नास्ति, न भातीति व्यवहारहेतुरावणद्वयमपि विनश्यति । तदानर्थनिवृत्तिरानन्दावाप्तिश्च भवतः इति सप्तावस्थाः सिद्धयन्ति । एवमाकाशवन्निर्मलचैतन्यवस्तुनि मिथ्याभूतप्रपञ्चकल्पनमध्यारोपः ।

अथापवाद उच्यते—कारणव्यतिरेकेण कार्यं नास्तीति बोधेन शुक्तिकायां रजतवद्रज्जौ सर्पवद् ब्रह्मणि प्रपञ्चो नास्तीति निषेधोऽपवादः । या मा सा माया, या न विद्यते साविद्या, इति व्युत्पत्त्या मायायाः कल्पितत्वं सिद्धम् । एवं यो ब्रह्मव्यतिरेकेण किमपि नास्ति तद्ब्रह्माहमेवेति विचार्य जानाति स एव जीवन्मुक्त इति वेदान्तसिद्धान्तः ।

स्थूलसूक्ष्मादिदेहानामात्मन्यारोप एव च ।
अपवादस्ततोऽप्येषां सम्यगत्र प्रदर्शितः ॥

इति [मायाविवरणे] प्रथमवर्णकं

समाप्तम् ।

अथ द्वितीयवर्णकम्

सर्ववेदान्तशास्त्रेषु ह्यनुब (न्धि) [न्ध] चतुष्टयम् ।
यथा पूर्वोक्तमत्रापि तथैव समुदीर्यते ॥

अथ द्वितीयवर्णकेऽनुबन्धिचतुष्टयमुच्यते । विषयः प्रयोजनं सम्बन्धः अधिकारी चेत्यनुबन्धिचतुष्टयम् । अस्य वेदान्तशास्त्रस्य ब्रह्मैव विषयः। मोक्ष एव प्रयोजनम् । प्रतिपाद्यप्रतिपादकभावो बोध्यबोधकभावो वा सम्बन्धः । साधनचतुष्टयसम्पन्न एवाधिकारी । यथा बृहस्पतिसवे ब्राह्मण एव, राजसूये क्षत्रियः, स्तोमे वैश्य तथा वेदान्तशास्त्रे साधनचतुष्टयसम्पन्न एवाधिकारी ।

साधनचतुष्टयं नाम नित्यानित्यवस्तुविवेकः, इहामुत्रार्थफलभोगाविरागः शमादिषट्कसम्पत्तिः, मुमुक्षुत्वं चेति । ब्रह्मव नित्यम् जगदनित्यमिति

श्रुतिस्मृतिपुराणादिना स्वयमेव जायमानं ज्ञानं नित्यानित्यवस्तुविवेकः । इह स्रक्चन्दनवनितादिविष (य) [यो]भोगः परत्र स्वर्गादिषु रम्भादिस्त्रीविषये भोगश्चो [श्चेत्यु] भयमप्यनित्यमिति श्ववान्ताशनमलमूत्रपुरीषादिवत्तत्र वैरस्यमिहामुत्रार्थफलभोगविरागः । शमदमोपरतितितिक्षा[:]श्रद्धासमाधाना[नि] इति शमादिषट्कम् । शमो नाम— श्रवणादिव्यतिरिक्तेभ्यो निवृत्यात्मन्येव श्रवणादिविषये मनसः स्थापनम् । दमो नाम—ज्ञानकर्मेन्द्रियनिग्रहः । उपरतिर्नाम—सर्वप्रपञ्चोपरमः सन्यासः, निष्कामकर्मानुष्ठानम् , व्यवहारलोपो वा । तितिक्षा-नाम—प्रारब्ध[ा]गतशीतोष्णादिसहनम् । श्रद्धा नाम—गुरुवेदान्तवाक्येषु विश्वासः । समाधानं नाम—श्रवणाद्यनुकूलविषये मनःसमाधिः । मुमुक्षुत्वं नाम—तत्र स्वगृहे दह्यमाने तत्रस्थदह्यमानपुरुषो यथा कलत्रपुत्रादिकं [त्यक्त्वा] स्वतापोपशमनार्थमेव बहिर्निर्गत्य तापोपशमनं कर्तुमिच्छति, एवं सांसारिकतापोपशमनं सम्पादयितुं त्यक्तसर्वेषणस्य ब्रह्मतादात्म्यभावे तीव्रेच्छा (मुमुक्षा) ।

लोके केषांचिन्नित्यानित्यवस्तुविवेके सत्यपि वैराग्यस्यादर्शनादिहामुत्रार्थफलभोगे विरागेणापि भवितव्यमित्युक्तम् । तदुभये सत्यपि केषांचिदृषीश्वराणां कोपतापादिदर्शनाच्छमादिनापि भवितव्यमित्युक्तम् । एतत्त्रितये सत्यपि केषांचिद्भक्तचेश्वरोपासकानां ज्ञानाधिकारादर्शनान्मुमुक्षयापि भवितव्यम् [इति] ।

एवंरूपोऽधिकारी उपा[प]हारसमित्पाणिः सन्सद्गुरुपगम्य नमस्कृत्य विश्वासविनयाभ्यां सह हे स्वामिन्, हे भगवन्निति सम्बोध्य जीवः कः, ईश्वरः क इति, जगत्कीदृशम्? एतत्त्रयं कस्मादागतम् कस्माद्गमिष्यतीति प्रश्नं कुर्यात्; 'परीक्ष्य लोकान्कर्मचितान्ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन । तद्विज्ञानार्थं स गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्' इत्यादिश्रुतेः । 'तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवये'ति गीतावचनाच्च ।

एवं विशेषेण प्रार्थितो गुरुर्दयया सत्वरजस्तमोगुणैर्जीवेश्वरजगतामागमनप्रकारं बोधयित्वात्मस्वरूपमपि करतलामलकवद्बोधयति । अस्याधिकारिणः साधनचतुष्टयं च बहुजन्मार्जितपुण्यपुञ्जपरिपाकवशादीश्वरानुग्रहेण

लभ्यामिति वेदितव्यम् । एतत्तत्वज्ञानप्रदायकं गुरुमीश्वरमेव विद्यात् । एवं यो गुरुमुखाज्जीवात्मपरमात्माभेदं विचार्य जानाति स एव मुक्तिं गमिष्यतीति सिद्धम् ।

इति [मायाविवरणे] द्वितीयवर्णकं

समाप्तम् ।

अथ तृतीयवर्णकम्

चेतनाचेतने ये वै श्रुतौ सम्यक् समथ्य[र्थि]ते ।

उच्येते श्रुणुतां ते द्वे तृतीये वर्णकेऽधुना ॥

अयं प्रपञ्चः कतिविध इति चेत् – आत्मेत्यनात्मेति च द्विप्रकारः । प्रपञ्चातीतस्यात्मनः कथं प्रपञ्चान्तर्भूतत्वमिति न शङ्कनीयम् । कथमिति चेत्—अस्य प्रपञ्चस्य चेतनाचेतनात्मकत्वादात्मनश्चेतनारूपत्वादात्मानं विना प्रपञ्चस्याभावादात्मनः प्रपञ्चान्तर्भावो वक्तव्य एव । तर्हि चेतनं किमचेतनं किमिति चेत् — जङ्गमं सर्वं चेतनम् । स्थावरं सर्वमचेतनम् । तर्हि चेतनानामचेतनानां च प्रत्येकं बहुप्रकारत्वात्कथं द्विप्रकार एव प्रपञ्च इति चेच्छृणु––आत्मैक(रूप)एव सह कार्यरूपेणानेकरूपोऽभूत् । आत्मा चैकरूप एव । स चानात्मकार्योपाधिभिरनेक जीवा इत्यनेकेश्वरा इति च भाति ।

एकस्येश्वरस्य जीववत्कथमनेकत्वमिति चेत्—पुण्यक्षेत्रेषु ग्रामेषु गृहेषु च शिवविष्ण्वादिमूर्तिभेदेन स्थितत्वादिति ब्रूमः । मृच्छिलादिरूपाणां तासां मूर्तीनां कथमीश्वरत्वमिति चेत्—उच्यते । सर्वैरपि तासु मूर्तिषु बहुद्रव्यव्ययं कृत्वाभिषेकनैवेद्यादेः क्रियमाणत्वात् । येषां शास्त्रविश्वासो नास्ति ते म्लेच्छादयो मूर्तीनां पूजने नोदाहरणीयाः । सर्वत्र श्रद्धावतामेवोदाहरणीयत्वात् ।

किं च हेये मलमूत्रात्मकेऽस्मिन्शरीरे आत्मबुद्धिं कुर्वतां जीवानामत्यन्तशुद्धासु मूर्तिषु ईश्वरबुद्धिकरणे को दोषः ? एवमेकस्या[ना]त्मनः कार्यरूपेणानेकत्वे एकस्यात्मनोऽनात्मकार्योपाधिभिरनेकत्वे च दृष्टान्तः क इति

चेच्छृणु । यथा एकैव पृथिवी कार्यरूपेण परिणता सती पर्वतो वृक्ष[क्ष] गोपुरं कुड्यं कुसूलं गृहं मठः पटः शराव इति भेदं गच्छति, यथा[च] आकाश एक एव पृथिव्यादिकार्योपाधिषु प्रविष्ट इव प्रतीयमानोऽयं घटाकाशोऽयं मठाकाश इत्यादिरुपेणानेकधा भाति, तथा मूलप्रकृतिरनात्मा एक एव कार्यशरीर[ादि]रुपेणानेको जातः । तथात्मा स्वयमेकोऽपि तत्तच्छरीरोपाधिभिस्तत्र तत्र प्रविष्ट इव सन् देवो मनुष्यो रामः कृष्णो ब्राह्मणः क्षत्रियो वैश्यः शूद्रः पशुपक्षिकृमिकीटा इति बहुधा भाति । अयमवच्छिन्नपक्षे दृष्टान्तः ।

प्रतिबिम्बपक्षे तु - समुद्रो नदी तटाकः कूपो घटजलमित्येकमेव जलं यथा बहुधा जातं तथा[ऽना]त्मापि बहुधा जातः । तेषु समुद्रादिषु [यथा] आदित्य एक एव प्रतिबिम्बितः सन् बहुधा जातस्तथैक एवात्मान्तःकरणसहितेषु सर्वेष्वपि प्रतिबिम्बितः सन् अनेको जात इत्युभयत्रापि दृष्टान्तो ज्ञातव्यः । यथा [च] जलधर्माः शीतलचलनादय आदित्यं बिम्बं न स्पृशन्ति तथान्तःकरणधर्माः कर्तृत्वभोक्तृत्वादयोऽपि तत्तदन्तःकरणविशिष्टचिदाभासा [स] एव भान्ति, बिम्बभूतमात्मानं न स्पृशन्ति । तस्माज्जीवात्मैव परमात्मा। परमात्मैव च जीवात्मा । कथमितिचेत्—यथा महाकाश एव घटाकाश एवमिति जानीहि ।

ननु जीवात्मनः कल्पितत्वात्कल्पितस्य चासत्यत्वात्कथं तस्य सत्यपरमात्माभेद इति चेत्—पारमार्थिको व्यावहारिकः प्रातिभासिकश्चेति जीवास्त्रिविधः । एते जीवाः सुषुप्तिजाग्रत्स्वप्नाभिमानिनः । यथा जले तरङ्गः कल्पितः, तरङ्गे च फेनः कल्पितः तथा पारमार्थिके व्यावहारिको व्यवहारिके प्रातिभासिकश्च कल्पितः । यथा माधुर्यद्रवशैत्यानि परमार्थतो जलनिष्ठान्येव सन्ति तरङ्गे भान्ति, तद्द्वारा फेनेऽपि भान्ति तद्वत्सच्चिदानन्दाः कूटस्थपारमार्थिकनिष्ठाः सन्तो व्यावहारिके भान्ति [द्वारा च प्रातिभासिके] । यथा फेनस्तरङ्गं विना नास्ति, तरङ्गोऽपि जलं विना नास्ति, जलं तु परमार्थभूतमेव भात्येवं प्रातिभासिको व्यावहारिकं विना नास्ति ; व्यावहारिकोऽपि पारमार्थिकं विना नास्ति। तस्माद्यथा परमार्थतो घटाकाशो महाकाश एव एवं पारमार्थिकः कूटस्थपरमात्मैवेति सिद्धान्तः ।

स एव "नेति नेति" इति वाक्येन देहादिपञ्चकोशेभ्यः पारमार्थिककूटस्थं पृथक्कृत्य तं पारमार्थिकं कूटस्थमहमिति जानन्नहं ब्रह्मास्मीति श्रुतिविचारेण युक्तिभिर्दृढनिश्चयेन च साक्षात्कृत्य तिष्ठति । स एव परिपूर्णः ब्रह्मस्वरूपः । तमेव पुण्यपापकर्माणि न स्पृशन्तीति सर्वा अप्युपनिषदः एकतात्पर्येण घुष्यन्ति ।

आत्मानात्मविवेकेन पुंसः संसारनिह्नुतिः ।
तद्विना जन्मकोट्यापि बन्धच्छेदो न सिद्ध्यति ॥

इति मायाविवरणे प्रपञ्चविमर्शनं नाम
तृतीयं वर्णकं
समाप्तम् ।

अथ चतुर्थं वर्णकम्

जनौ यद्दुःखमन्त्ये[न्ते] तत्किंस्वरूपमुतास्य तत् ।
सम्यगागन्तुकं वेति मया बुद्ध्या विचार्यते ॥

इदानीमस्य जीवस्य यद्दुःखं च जन्म च कर्म च रागद्वेषादि चाभिमानश्चाविवेकश्चाज्ञानं चेति एतेषु पूर्वं पूर्वं प्रत्युत्तरोत्तरं हेतुः । तत्र दुःखादिचतुष्टयं चतुर्थे वर्णके विचार्यते ।

जीवात्मनो दुःखं स्वाभाविकं वागन्तुकं वेति चेदागन्तुकमिति ज्ञेयम् । स्वाभाविकं चेदनेकदोषाः सन्ति । तत्कथमिति चेत्——अस्य जीवस्य दुःखं स्वाभाविकं चेद्दुःखनिवृत्तिः कदापि न स्यात् । सुखमपि कस्यापि न स्यात् । दुःखनिवृत्यै सुखप्राप्त्यै च कर्म मास्तु । सत्कर्मयोगध्यानोपासनेषु कस्यापि प्रयत्नो मास्तु । वेदशास्त्रपुराणानि च व्यर्थानीति जानीहि । [तर्हि] दुःखं स्वाभाविकमस्तु, तन्निवृत्यै प्रयत्नं करोत्विति चेत्कदाचिदपि एतन्न सम्भवति । स्वाभाविकस्य स्वरूपत्वात् । स्वस्वरूपनाशार्थं को वा प्रयत्न कुर्यात् । स्वरूपनाशे सति कः पुरुषार्थभाक्स्यात् । स्वाभाविकमेव स्वरूपं कथमिति चेत्—गुडस्य मधुरगुणः स्वभावः । तस्य मधुरगुणस्य नाशे भवितव्ये

गुडस्यैव नाशो भवेत्। तथा जीवात्मनो दुःखं स्वाभाविकं चेद्दुःखनाशे भवितव्ये आत्मस्वरूपनाश एव स्यात्। [नश्यत्वात्मापीति चेद्] आत्मनो नाशो नास्ति। अविनाशीति नित्य इति च 'अविनाशी वारेऽयमात्मा', 'आकाशवत्सर्वगतश्च नित्यः', 'न जायते म्रियते वा विपश्चिन्नायं कुतश्चिन्न बभूव कश्चित्। अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे' इत्यादिश्रुतयो वदन्ति। तस्मादात्मनो दुःखं स्वाभाविकं न भवति। आगन्तुकमेव।

स्वाभाविकं नश्यतु स्वरूपं तिष्ठतु इति चेत्—न सम्भवति। नन्वग्नेः स्वाभाविकमुष्णत्वं मणिमन्त्रादिभिर्गच्छति स्वरूपनाशस्तु नास्ति, अन्यच्छैत्यमप्यागच्छति, तथात्मनोऽपि दुःखं स्वाभाविकं भवतु। तदुत्कृष्टकर्मोपासनायोगबलेन गच्छतु। सुखं चागच्छत्विति वदसि चेत्—सा निवृत्तिस्तात्कालिक्येव, नात्यन्तिकी। कथमिति चेत्। कर्मजन्यं सकलमपि तन्नाशे नश्यति। त्वदुक्तदृष्टान्तदार्ष्टान्तिकयोरग्न्यात्मनोरुष्णत्वं दुःखवत्त्वं च मणिमन्त्रादिभिरुत्कृष्टकर्मोपासनयोगैश्च गतमपि तत्कर्मक्षये शैत्यं च सुखं च गच्छेत्। पुनः स्वाभाविकमुष्णत्वं दुःखवत्त्वं चागच्छेत्। एवं सति सर्वजीवानां तात्कालिकमुक्तिं विना पुनर्जन्मरहिता मुक्तिर्न स्यात्। किं च मोक्षस्य जन्यत्वेऽनित्यत्वमपि स्यात्। 'न स पुनरावर्तते' इति मुक्तेर्नित्यत्वप्रतिपादकश्रुतेः, 'अखण्डमानन्दमरूपमद्भुतम्' इति श्रुतेश्च विरोधः स्यात्। [किंच] आत्मनो दुःखस्वभावत्वे सुषुप्त्यवस्थायां तूष्णींभावे योगिनां समाधौ च दुःखमेव प्रतीयात्। तथा न दृश्यते। किं तु त्रयाणामप्युत्थानानन्तरं "एतावत्पर्यन्तमहं सुखमेवासम्" इति सुखमेव स्मर्यते। तस्मादात्मनः सुखमेव स्वाभाविकम्। दुःखमागन्तुकमिति जानीहि। सुखस्वरूपस्याप्यात्मनो दुःखं शरीरपरिग्रहेणागतम्; यत्र यत्र शरीरपरिग्रहस्तत्र तत्र दुःखमिति व्याप्तेः।

ननु लोके राजादीनामपि शरीरपरिग्रहेण दुःखमस्ति वेति चेत्—अस्त्येव; तेषामपि शत्रुवर्द्धनेन राज्यभारेण धनधान्यक्षयेण स्त्रीपुत्रादिमरणेन जरादिना स्वमरणेन च दुःखदर्शनात्। लोके केचित्सुखेन वर्तन्त इति व्यवहारो वृथामोह एव। मोहेनापि [यतो] दुःखस्य

सुखत्वव्यवहारः । कथमिति चेत् । भारवाहको बहुयोजनदूरं कार्यार्थं त्वरया धावन्, सन्ततरूपि कृष्यादिकर्मकरणशीलश्चैवमादयः सर्वेऽपि स्वस्वकर्मणो दुःखस्वरूपत्वेऽपि मोहेन तत्तत्कर्म सुखं मत्वा सन्तुष्टा मानं कुर्वन्तः सन्त उत्साहवन्तश्च वर्तन्ते । तस्मान्मोहेन दुःखमेव सुखं भातीति ज्ञातव्यम् ।

तर्हि विवेकिनामपि शरीरपरिग्रहाद्दुःखमस्ति वेति चेत्—तेषामपि क्षुत्पिपासादिना, शीतोष्णादिना, व्याधिना, सर्पवृश्चिकव्याघ्रादिना[च] दुःखमस्त्येव । तर्हि विवेक्यविवेकिनोः को विशेष इति चेत्—तयोर्बाह्यव्यापारेण विशेषाभावेऽपि अन्तर्व्यापारेण विशेषोऽस्ति । यो विवेकी स महात्मा "सकलमपि दुःखमन्तःकरणस्यैव, नात्मनः सच्चिदानन्दस्वरूपस्य आत्मनोऽनृतजडदुःखस्वरूपान्तःकरणधर्मैरणुमात्रमपि सम्बन्धो नास्ति" इति श्रुतियुक्त्यनुभवैर्विचार्य ज्ञात्वा तिष्ठति । तथा हि 'असङ्गो ह्ययं पुरुष' इति श्रुतेः [तिः] । निरवयवत्वसत्यत्वादिका युक्तयः । सुषुप्तिमूर्च्छासमाधिषु अनुभवो वेदितव्यः ।

योऽविवेकी स दुरात्मा तु आत्मस्वरूपमविचार्य देहादिकमेवात्मान मत्वा अनात्मधर्मानात्मनि, आ[त्मधर्मांश्चानात्मन्या] रोप्यैवमन्योन्याध्यासं कुर्वन्नहं देवोऽहं मनुष्योऽहमान्ध्रोऽहं द्राविडोऽहं कर्णाटकोऽहं महाराष्ट्रोऽहं गूर्जरोऽहं ब्राह्मणोऽहं क्षत्रियोऽहं वैश्योऽहं शूद्रोऽहं ब्रह्मचार्यहं गृहस्थोऽहं वानप्रस्थोऽहं सन्यास्यहं श्रीवत्सगोत्रोऽहं भारद्वाजगोत्रोऽहं वासिष्ठगोत्र इत्यादिप्रकारेण जाति [देश] वर्णाश्रमा [द्य] भिमानी तिष्ठति । एवं विवेक्यविवेकिनोर्बहुभेदोऽस्ति ।

विचार्यमाणे तयोर्बाह्यव्यवहारेणापि न साम्यम् । कथमिति चेत्—विवेकी प्रपञ्चं सर्वं मिथ्येति निश्चित्य प्रारब्धभोगमपि स्वप्नभोगतुल्यमेव पश्यति । अविवेकी तु प्रपञ्चः सत्यः, आत्मनः सुखदुःखानुभवोऽपि सत्य एवेति पश्यति । एवं विवेकिनामपि शरीरपरिग्रहाद्दुःखमस्त्येव ।

देवानामपि 'वज्रहस्तः पुरन्दर' इत्यादिना वेदेषु शरीरपरिग्रहस्य दर्शनाद्दुःखमस्त्येव । कथमितिचेत्—अन्योन्यं युध्य [द्ध] तः कोपशापाभ्यामसुरराक्षसोपद्रवात्पुण्यकर्मफलनाशे सति भाव्यधःपतनभयादपि दुःखमस्त्येव ।

[नन्वेवं] कथं दुःखिनामपि तेषामितरैरुपास्यत्वम्। कथं [च] तत्सुखदातृत्वमिति चेत्—अस्मिन् लोके राजप्रभृतीनां दुःखिनामपि [स्वाश्रितोपास्यत्व] स्वाश्रितपरिपालनादिकं यथा तथेति ज्ञेयम्। 'देवलोके देवा आनन्दरूपास्तिष्ठन्ति' इति श्रुतेः देवा दुःखं सर्वमप्यन्तःकरणधर्मं मत्वात्मानमानन्दरूपं सदानुभवन्त एव तिष्ठन्तीति तात्पर्यम्। तेषामपि दुःखमस्तीति वदन्त्याः 'ता एता देवताः सृष्टा अस्मिन्महत्यर्णवे प्रापतन्' इति श्रुतेश्च देवानामपि शरीरपरिग्रहाद्दुःखमस्त्येवेति तात्पर्यम्। तस्मादेवेह मुक्त्यर्थमेव प्रयत्नः कर्तव्यः।

नन्वशरीरमुक्तेरेव मुक्तित्वं चेन्न। [स] शरीरा आकाशे नक्षत्ररूपेण परिदृश्यमानाः केचन देवा मुक्ता इति मनुष्यैः कथ्यन्ते इति चेच्छृणु। सालोक्यं सारूप्यं सामीप्यं सायुज्यं चेति चतुर्विधा मुक्तिः। चर्या क्रिया योगो ज्ञानमिति चत्वारि साधनानि। भगवत्कैङ्कर्यरूपदासभावश्चर्या। शिवविष्णुपूजाविधिः क्रिया। यमनियमाद्यष्टाङ्गो योगः। जीवपरयोरैक्यसाक्षात्कारो ज्ञानम्।

तत्राद्यास्तिस्रो मुक्तयो मुख्या न भवन्ति, पुनरावृत्तिसद्भावात्। सायुज्यमेव मुख्या मुक्तिः, पुनरावृत्तिवर्जनात्। योगेन सायुज्यमिति शास्त्रं निर्गुणब्रह्मजीवयोरैक्ययोगविषयम्। [स] शरीरमुक्तानामिवाशरीरमुक्तानां कदापि कुत्रचिदपि केनापि कथंचिदपि दर्शनाभावाच्छून्यमेवाशरीरमुक्तिरिति न मन्तव्यम्।

अशरीरमुक्तानां शरीरस्यैव शून्यत्वं, न स्वरूपसुखस्य। स्वरूपसुखं तु सुषुप्तिसुखवदशरीरत्वात्स्वसंवेद्यमेव नान्यसंवेद्यम्। सुषुप्तिर्मुक्तिसमाना चेत्सापि मुक्तिः स्यादिति न वाच्यम्। सुखानुभवमात्रेण साम्येऽपि सुषुप्तावज्ञानं पुनरुत्थानं चास्ति। मुक्तौ [तु] तदुभयमपि नास्ति। ततः सुषुप्तेर्मुक्तित्वं न सम्भवति। अत एव प्रलयस्यापि न मुक्तित्वम्। एवं सुषुप्तिसुखवन्मुक्तिसुखस्यापि स्वानुभवगम्यत्वात्प्रत्यक्षत्वमेव न शून्यत्वम्।

तर्हि सशरीरमुक्तानामिवाशरीरमुक्तानामपि प्रत्यक्षत्वे को भेद इति चेत्—अज्ञाननिवृत्तिः पुनरुत्थानाभावश्च भेद इत्युक्तम्। एवं श्रुतियुक्तिभ्यामशरीरमुक्तेः परमसुखत्वं शरीरपरिग्रहणेन दुःखं चोक्तम्।

इदानीमनुभवेनापि तदुभयं वदामः । नित्यं सुषुप्तौ शरीरपरिग्रहाभावाद्-दुःखाभावश्च, जाग्रत्स्वप्नयोः शरीरपरिग्रहेण दुःखं च सर्वैरनुभूयते । तस्माद्यत्र यत्र शरीरपरिग्रहस्तत्र तत्र दुःखमिति व्याप्तेरानन्दरूपस्यात्मनः शरीरपरिग्रहादेव दुःखमागच्छति न तु स्वतः ।

तस्य शरीरस्य को वा हेतुरिति चेत्---पूर्वकर्मसहितपञ्चीकृतभूतान्येव, न केवलभूतानि । [अतः] तेषां सर्वत्र वर्तमानत्वात्तेभ्यः शरीरं स्यादिति न वक्तव्यम् । ननु शुक्लशोणितरूपेण परिणतानामेव भूतानां शरीरकारणत्वेन विवक्षितत्वात्तादृशान्येव शरीरस्य कारणमिति न वक्तव्यम् ; व्यर्थशुक्लशोणितेषु शरीरोत्पत्त्यदर्शनात् । तस्मात्कर्म-सहितान्येव शरीरस्य कारणानि । पञ्चभूतानां देशकालादीनां च सर्व-साधारणत्वात्तत्तत्कर्मवैचित्र्यमेव हेतुः शरीरवैचित्र्ये । यथा मृदादीनां साधारणत्वेऽपि कुलालव्यापारवैचित्र्यमेव घटादिकार्यवैचित्र्ये हेतुः, यथा[च] दृष्टान्ते मृदुपादानकारणं कुलालव्यापारो निमित्तकारणमेवं दार्ष्टान्तिके ऽपि शरीरस्य पञ्चीकृतभूतान्युपादानम् । तत्तत्कर्म निमित्तम् । तस्माद्भोगप्रदकर्मणि सति शरीरपरिग्रहः यथा जाग्रत्स्वप्नयोः । कर्म(णि) [ण्य] सति [न] शरीरम् । यथा च सुषुप्तौ कर्माभावे शरीराभावः ।

किं च [यथा] मृदि सत्यामपि कुलालव्यापाराभावे घटोत्पत्त्यभावः, तथा ईश्वरसृष्टपञ्चभूतेषु सत्स्वपि आत्मज्ञानेन कर्मसु नष्टेषु तस्य ज्ञानिनः शरीरं नो(पप)[त्प]द्यते ।

ननु कर्मशास्त्रे 'अवश्यमनुभोक्तव्यमिति' 'नाभुक्तं क्षीयते कर्मे'ति च, ज्ञानशास्त्रे 'ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा' इति, वचनयोः परस्परं विरोधे कथं निर्णयः कर्तव्य इति चेच्छृणु । शास्त्रे [हि] प्रबलवचनं दुर्बलवचनं चास्ति । प्रबलं सिद्धान्तवचनम् । दुर्बलं पूर्वपक्षवचनम् । प्रबलं दुर्बलं निरस्यति । तद्यथा 'अहिंसा परमो धर्म' इति वचनं दुर्बलम् । तद् 'यागे पशुबन्धः कर्तव्य' इति वचनं प्रबलं निरस्यति । एवं 'अवश्यमनुभोक्तव्य' मितिवचनं 'तपसा कल्मषं हन्तीति' प्रबलवचनेन दुर्बलं निरस्यते । तस्मात्सञ्चितेषु

कर्मसु बहुषु सत्स्वपि ज्ञानेन तानि नश्यन्त्येव । कर्माभावे जन्माभावः । जन्माभावे दुःखाभावः । दुःखाभावे आनन्दाविर्भावः इत्ययमेव सिद्धान्तः ।

सशरीरस्य दुःखित्वव्याप्तिरव्याहता यतः ।
अतः शरीरमुक्त्यर्थं यत्नं कुर्यादतन्द्रितः ॥
न भूतपञ्चकान्नापि कर्मणः केवलादपि ।
उभाभ्यां मिलिताभ्यां तच्छरीरमुपजायते ॥
तच्छरीरानवाप्तिश्च ज्ञानादेव न चान्यतः ।
अतः सर्वप्रयत्नेन ज्ञानाभ्यासरतो भवेत् ॥

इति श्रीमच्छङ्कराचार्यविरचिते मायाविवरणे चतुर्थं वर्णकं समाप्तम् ।

अथ पञ्चमं वर्णकम् ।

कस्मादात्मनो दुःखम् । शरीरपरिग्रहात् । शरीरं[च] कर्मणेत्युक्तम् । तत्कर्म किं कतिविधमितिचेच्छृणु । कर्म त्रिविधम् । पुण्यं पापं मिश्रं चेति । देवादिशरीरं पुण्यकर्मफलम् । मनुष्यादिशरीरं पुण्यपापमिश्र-कर्मफलम् । तिर्यगादिशरीरं सर्वं पापकर्मफलम् ।

एवमुक्तत्रिविधमपि कर्म उत्कृष्टं मध्यमं सामान्यमिति प्रत्येकं त्रिविधम् । एवमुक्तकर्मभेदेन जन्मभेदश्च नानाप्रकारः ।

तथाहि हिरण्यगर्भादिशरीरं पुण्योत्कृष्टम् । इन्द्रादिशरीरं पुण्य-मध्यमम् । यक्षराक्षसपिशाचादिशरीरं पुण्यसामान्यम् । परतापकरं कण्टक-वृक्षविषवृक्षव्याघ्रसर्पवृश्चिकोलूकमशकजलूकादिशरीरं सर्वं पापोत्कृष्टम् । पनसाम्रकदलीनारिकेलादिफलपत्रपुष्पविनियोगवद्वृक्षलतादि (च) ग्रामसूकर-महिषगर्दभोष्ट्रादिकं सर्वं शरीरं पापमध्यमम् । अश्वत्थतुलसीबिल्वग-वाश्वादिकं सर्वं पापसामान्यम् ।

इह मनुष्यलोके निष्कामकर्मानुष्ठानसाधनचतुष्टयसद्गुरुलाभश्रवणमन-नात्मज्ञानक्रमेण जीवन्मुक्तेर्विदेहमुक्तेश्च योग्यं मनुष्यशरीरं मिश्रकर्मोत्कृष्टम् । स्वाश्रमोचितकर्मणां काम्यकर्मणां चानुष्ठानयोग्यं शरीरं मिश्रकर्ममध्यमम्

चण्डालपुल्कसकिरातयवनादिशरीरं मिश्रकर्मसामान्यम् । तस्माद्विवेकिना पुरुषेणैतत्कर्मफलतारतम्यं विचार्य भूमौ मनुष्यजन्मनि मिश्रकर्मोत्कृष्टजन्म यथा सिद्ध्येत्तथा [स्व] स्ववर्णाश्रमकर्माणि कृत्वा फलेच्छां विहाये- श्वरार्पणं कृत्वात्मविचारणद्वारा मोक्षप्राप्तावेव प्रयत्नः कर्तव्य इति सिद्धान्तः ।

एतत्त्रिविधमपि कर्म केन क्रियत इति चेत्—त्रिविधकरणैरेव क्रियत इति जानीहि । नन्वस्मिँल्लोकेऽहं करोम्यहं करोमीति वदतां सर्वेषां अनुभवेनास्मिन्देहे देहाभिमानी सन्नहंशब्दार्थतया य आत्मा वर्तते तस्यात्मनः कर्तृत्वे वक्तव्ये तं विहाय त्रिविधकरणानां भवद्भिः कर्तृत्वं कथमुच्यत इति चेच्छृणु । आत्मा अविकारी निष्क्रियः स्वगतभेदशून्यः । तस्मादात्मनः कर्तृत्वं वक्तुं न शक्यते ।

ननु कर्तृत्वं स्वात्मनिष्ठतया भाति । कर्ता चान्यो न दृश्यते । कथमितिचेच्छृणु । आत्मनि प्रतीयमानं कर्तृत्वमध्यासान्न स्वभावत इति जानीहि । स्वाभाविकमिति चेत्, न केनापि वेदान्तविचारं कृत्वा ममेदं कर्तृत्वं परिहरणीयम् । अस्यानपाये संसारबन्धोऽपि नापयास्यतीति व्यर्थः प्रयासः करणीयः ।

आत्मनः कर्तृत्वं स्वाभाविकं भवतु । प्रयत्नविशेषेण नश्यत्विति चेन्न । स्वभावस्य स्वस्वरूपत्वात् । किं च स्वरूपनाशार्थं को वा प्रयत्नं कुर्यात् । स्वरूपनाशे सति को वा पुरुषार्थमनुभवेत् । किं चाकर्ता जीवन्मुक्तो न चेत्तदा वेदान्तसम्प्रदायो गुरुः शिष्यश्च न स्युः । किं चात्मा कर्ता साक्षी निष्क्रिय इति प्रतिपादकस्य ‘ निष्क्रियं निष्फलं शान्तं निरवद्यं निरञ्जनम् ’ । ‘ साक्षी चेता केवलो निर्गुणश्च ’ । इत्यादिश्रुतिवाक्यस्यापि हानिः स्यात् ।

सुषुप्तावात्मनि विद्यमानेऽपि कर्तृत्वं न दृश्यते । यदि कर्तृत्वं स्वाभाविकमग्नेरूष्णत्वमिवोपलभ्येत । तथा नोपलभ्यते । तस्मादात्मन कर्तृत्वं न स्वाभाविकम् ।

ननु सुषुप्तौ कर्तृत्वानुपलम्भः करणवियोगात्। यथा तक्षादेः कर्तृत्वे विद्यमानेऽपि स्नानभोजनादिसमये तदनुपलम्भस्तद्वद्भवत्विति चेन्न। तूष्णीम्भूतावस्थायां अन्तःकरणसंयोगे विद्यमानेऽपि कर्तृत्वानुपलम्भात्कर्तृत्वं न स्वाभाविकम्। किंत्वाध्यासिकमेव।

अध्यासो नामान्यनिष्ठधर्माणामन्यत्रावभासः। यथा नौनिष्ठगमनस्य तीरस्थवृक्षे वृक्षनिष्ठाचलत्वस्य नावि चाध्यासवशाद्भानम्। एवं त्रिविध-करणनिष्ठकर्तृत्वस्यात्मनि आत्मनिष्ठाकर्तृत्वस्य त्रिविधकरणे च भानमज्ञान-वशादेव। तस्मादात्मनः कर्तृत्वमारोपादिति जानीहि।

ननु जडस्य त्रिविधकरणस्याचेतनत्वादचेतनस्य कथं कर्तृत्वम्। करणत्रयस्यैव कर्तृत्वे तस्य करणान्तरेणापि भवितव्यमिति चेच्छृणु। यथा लोकेऽचेतनस्य वायोर्वृक्षादीनामुन्मूलने तेषां दूरनिरसने च यथा [वा] जलप्रवाहस्याप्यचेतनस्य वृक्षादीनामुन्मूलने तेषां दूरनिरसने च करणं विना कर्तृत्वं दृश्यते तथा त्रिविधकरणस्यापि करणान्तरं विना कर्तृत्वमुपपद्यते।

एवं त्रिविधकरणकृतानि कर्माणि कानीति चेदुच्यते। सविशेषचिन्ता निर्विशेषचिन्ता परलोकचिन्ता भक्तिज्ञानवैराग्यचिन्ता इत्यादिविकाराः सर्वे मनसा क्रियमाणानि कर्माणि मानसपुण्यकर्माणि। विषयचिन्ता परेषामपकारचिन्ता वेदशास्त्रयोरप्रामाण्यचिन्ता धर्माधर्माद्यभावचिन्ता इत्यादि-बुद्धिविकाराः सर्वे मानसपापकर्माणि। सविशेषचिन्ताया निर्विशेषचिन्तायाः पुण्यचिन्ताया अपि विषयचिन्तादिपापचिन्तया मिश्रीकृत्यानुष्ठानं मानसमिश्रकर्म।

वेदाध्ययनं शास्त्रगीतासहस्रनामादिपठनं पञ्चाक्षरादिमन्त्रजपः भगवन्नामसङ्कीर्तनं परोपकारवार्ता सत्यवाक्यं मृदुपूर्वभाषणं च वाचा क्रियमाणं पुण्यकर्म। वेदशास्त्रदेवतादिदूषणमसत्यपिशुनपारुष्यापहासवार्ता चेत्यादि सर्वं वाचिकं पापकर्म। वेदाध्ययनपूजाकालादिपुण्यवार्तासु परनिन्दाया असत्यस्य परिहासस्य लौकिकवार्तायाश्चैवमादिपापानां मिश्रीकृत्यानुष्ठानं वाचिकं मिश्रकर्म।

पुण्यतीर्थस्नानं गुरुदेवतानमस्कारः देवपूजा प्रदक्षिणं सज्जनदर्शनं त्यागः लोकानुग्रहसंचारः एवमादीनि कायेन क्रियमाणानि कर्माणि कायिकं पुण्यकर्म। परहिंसापरस्त्रीसङ्गचौर्यदुष्टसङ्गादि कायेन क्रियमाणं कायिकं पापकर्म। ब्राह्मणभोजनार्थं ब्राह्मणोपद्रवः, देवालयनिर्माणार्थं परद्रव्यापहारः, प्रपां स्थापयित्वा भृतकस्याप्रदानमेवमादीनि पुण्यानि पापानि च मिश्रीकृत्य कायेनानुष्ठीयमानानि कायिकं मिश्रकर्म। एतानि त्रिविधान्यपि कर्माणि सम्यग्विचारणीयानि।

विचारस्य फलं किमिति चेत्। मुख्यफलमवान्तरफलमितिद्वयमस्ति। कथमितिचेत्। इमानि त्रिविधकर्माणि त्रिविधैरेव करणैः क्रियन्ते। आत्मा त्वयमाकाशवदसङ्गः निरंशः परिपूर्णः चैतन्यस्वरूपः। अतो न कस्यापि कर्मणः कर्ता। अत एव—

यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह।
यच्चास्य सन्ततो भावस्तेन चात्मेति गीयते॥

इत्युक्त[आ]त्मशब्दार्थः। तस्मान्नैकमपि कर्म चिदाकाशस्वरूपं मां स्पृशतीति ज्ञात्वा संशयं विहाय दृढानुभवेनावस्थानं मुख्यफलम्। ब्रह्मज्ञाने सत्यपि त्रिविधकरणमपि पुण्यकर्मण्येव स्थापयितव्यम्। तदसम्भवे मिश्रकर्मणि वा स्थापयितव्यम्। न कदाचिदपि पाप कर्मणीति ज्ञात्वा तथैवावस्थानमवान्तरफलम्। यथा कदली-पोषकस्य कदलीफलं मुख्यफलम्। तत्पत्रपुष्पादिकमवान्तरफलं तथैव त्रिविधकरणकृतकर्म(ज्ञान)स्यापि पूर्वोक्तफलद्वयमिति ज्ञेयम्।

नन्वम्भसा पद्मपत्रमिव कर्मणा ज्ञानी न लिप्यते। तस्य न कोऽपि विधिर्निषेधो वा। स त्वकर्ता कर्मसाक्षी कृतकृत्य इति सिद्धान्तितत्वात्तस्य ज्ञानिनः आत्माज्ञानिन इव पुण्यं कर्मैव अनुष्ठेयमिति नियमः कथमिति चेत्सत्यम्। ज्ञानी कृतकृत्य एव। कर्तापि न भवति। न तत्र सन्देहः। तथापि ब्रह्मविद्, ब्रह्मविद्वरः, ब्रह्मविद्वरीयान, ब्रह्मविद्वरिष्ठः इत्येतेषां मध्ये ब्रह्मविद्वरिष्ठ एव विदेहमुक्तः। असौ वरिष्ठ एव वृत्तिशून्यः। तस्य न विधिर्न निषेधश्च।

अन्येषामपि त्रयाणां ज्ञानमहिम्ना विधिनिषेधाभावेऽपि वृत्तिशून्यत्वाभावाद्व्यवहारित्वाच्च लोकानुग्रहार्थं सदाचार एव स्थातव्यमित्युच्यते। न तु नियम्यते। तस्मात्तत्वज्ञानिना कर्मिणां मध्ये कर्मिवत्कर्मानुष्ठेयम्। जिज्ञासूनां मध्ये तत्कर्म त्यक्त्वा ब्रह्मैव सत्यमन्यत्सर्वमसत्यमिति ज्ञानमेवोपदेष्टव्यम्। अत्र प्रकृतं किमिति चेत्। त्रिविधकरणस्यैव कर्तृत्वं नात्मन इति निश्चितम्।

अथ त्रिविधमपि करणं किं स्वयमेव कर्तृ अन्येन प्रेरितं वेति विचार्यमाणे रागद्वेषादिना प्रेरितमेव कर्तृ न स्वयम्। रागद्वेषादौ सति करणत्रयं प्रवर्तते असति न प्रवर्तत इत्यन्वयव्यतिरेकाभ्यां रागद्वेषादेःकरणप्रवर्तकत्वस्यानुभवसिद्धत्वात्। नन्वहं देवालयं कारयामि तटाकं खानयामि इत्यादिव्यवहारादात्मा कारयिता भवत्विति चेन्न। आत्मनो निर्विकारत्वान्न कुत्रापि कारयितृत्वमुपपद्यते। आत्मनि कारयितृत्वं भाति चेज्जपाकुसुमनिष्ठं लौहित्यं स्फटिक इव रागद्वेषादिनिष्ठं कारयितृत्वमात्मनि भ्रान्त्यारोप्यत इति ज्ञेयम्। स्वाभाविकं चेत्तन्नाशार्थं न कोऽपि प्रयत्नं कुर्यात्। स्वाभाविकस्य स्वरूपत्वात्। कथंचित्तस्य नाशे स्वरूपनाश एव स्यात्।

आत्म(ज्ञानि)नोऽपि कारयितृत्वं यदि स्यादात्मासङ्गो निष्क्रियोऽकारयितेति प्रतिपादिका 'अदृश्यमव्यवहार्यमग्राह्यमलक्षणमचिन्त्यमव्यपदेश्यमेकात्मप्रत्ययसारं प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेय' इति श्रुतिर्भज्येत। (कारयितृत्वस्य जन्यत्वे तज्जन्यमुक्तेरपि जन्यत्वं स्यात्) सुषुप्तावपि कारयितृत्वं दृश्येत। तन्नदृश्यते। तस्मादात्मनः कारयितृत्वं न स्वाभाविकम्। किन्त्वागन्तुकमेव।

ननु सुषुप्तौ कारयितृत्वादर्शनमात्रेणात्मनः कारयितृत्वं नास्तीति वक्तुं न शक्यते। यथोपाध्यायकस्याध्यापकत्वं विद्यमानमपि शिष्यवर्गासन्निधौ न दृश्यते तद्वत्सुषुप्तौ करणसंयोगाभावात् विद्यमानमपि कारयितृत्वं न दृश्यते। जाग्रत्स्वप्नयोः करणसंयोगे सति दृश्यते इति वक्तुं शक्यत्वादिति चेत्। तर्हि जाग्रत्युदासिनतूष्णीमवस्थायां करणसंयोगस्य विद्यमानत्वात्कारयितृत्वं दृश्येत। तन्न दृश्यते। तस्मादागन्तुकमेवेति

वक्तव्यम् । यथान्योन्याध्यासादयोनिष्ठदीर्घह्रस्वत्वादयोऽग्नौ, अग्निनिष्ठलौहित्यौष्ण्यप्रकाशादयोऽयसि च भान्ति तद्वदज्ञानादेव रागद्वेषादिनिष्ठकारयितृत्वमात्मनि आत्मनिष्ठाकारयितृत्वं रागद्वेषादौ च भाति ।

नन्वचेतनस्य रागद्वेषादेः कथं कारयितृत्वम् न घटो घटान्तरं प्रेरयतीति चेत्सत्यम् । तथापि कुत्रचिद्योग्यतावशात् [जडो]जडं प्रेरयति । योग्यताभावात्कत्राचिन्न प्रेरयति' यथा जडोऽप्याग्निर्गन्धकादिसंयुक्तेङ्गिलादिचूर्णविशेषैः सहितः सन् जडमेव बृहन्नालिकान्त[स्थ]स्थूलपाषाणं प्रेषयित्वा तेन चतुरङ्गसेनां हन्ति ।

किं च प्रेतशरीरं जडमपि स्वज्ञातिक्रियमाणामपरक्रियां प्रति स्वयं कारयितृ भवति । एवमचेतनमपि रागद्वेषादि कारयितृ भवति । तर्ह्यात्मा हृषीकेशः सर्वान्तर्यामीति वदन्त्याः श्रुतेः किं तात्पर्यमिति चेत्, आदित्यवत्सन्निधानमात्रेण सर्वकार्यानुकूलो भवतीति तात्पर्यम् ।

